"किराततिक्तकं मुस्तं गुडूची विश्वभेषजम् ।
पाठोदीच्यं मृणालञ्च शृतं पित्ताधिके पिबेत् ॥"
इति किरातादिसप्तकम् ॥*॥
अथ कफोल्वणसन्निपातज्वरस्य चिकित्सा ।
"बृहत्यौ पौष्करं भार्गी शटी शृङ्गी दुरालभा ।
वत्सकस्य तु बीजानि पटोलं कटुरोहिणी ॥
बृहत्यादिर्गणः शस्तः सन्निपाते कफोत्तरे ।
श्वासादिषु च सर्व्वेषु हितः सोपद्रवेष्वपि ॥"
इति बृहत्यादिक्वाथः ॥*॥
अथ वातपित्तोल्वणसन्निपातज्वरस्य चिकित्सा ।
"वातपित्तहरं हृद्यं कनीयः पञ्चमूलकम् ।
तत्क्वाथो मधुना हन्ति वातपित्तोत्तरं ज्वरम् ॥"
इति लघुपञ्चमूलम् ॥*॥
अथ वातश्लेष्मोल्वणसन्निपातज्वरचिकित्सा ।
किराततिक्तकं मुस्तं गुडूची विश्वभेषजम् ।
चातुर्भद्रकमित्याहुर्व्वातश्लेष्मोल्वणे ज्वरे ॥"
इति चातुर्भद्रकक्वाथः ॥*॥
अथ पित्तश्लेष्मोल्वणसन्निपातज्वरचिकित्सा ।
"पर्पटः कट्फलं कुष्ठमुशीरं चन्दनं जलम् ।
नागरं मुस्तकं शृङ्गी पिप्पल्येषां शृतं हितम् ।
तृष्णादाहाग्निमान्द्येषु पित्तश्लेष्मोल्वणे ज्वरे ॥"
इति पर्पटादिक्वाथः ॥*॥
अथ वातपित्तश्लेष्मोल्वणसन्निपातज्वरचिकित्सा ।
"नागरं धान्यकं भार्गी पद्मकं रक्तचन्दनम् ।
पटोलं पिचुमर्द्दञ्च त्रिफला मधुकं बला ॥
शर्करा कटुका मुस्ता गजाह्वा व्याधिघातकः ।
किराततिक्तममृता दशमूली निदिग्धिका ॥
योगराजो निहन्त्येष सन्निपातत्रिकोल्वणम् ।
सन्निपातसमुत्थानं मृत्युमप्यागतं जयेत् ॥"
गजाह्वा गजपिप्पली । व्याधिघातकः आरग्वधः ।
निदिग्धिका हि गुणार्थे पृथक् पठिता । इति
योगराजक्वाथः ॥*॥ अथ प्रवृद्धमध्यक्षीणवातादिजनितसन्निपातज्वराणां षण्णां तन्त्रेण चिकित्सामाह ।
"प्रवृद्धं कर्षयेद्दोषं क्षीणं संवर्द्धयेद्भिषक् ।
चिकित्सेयं विधातव्या दोषयोर्वृद्धहीनयोः ॥"
अस्यायमर्थः । प्रवृद्धं दोषं कर्षयेत् तत्क्षयहेतुभिरौषधाद्यविहारैः क्षपयित्वा समीकुर्य्यात् क्षीणं दोषं संवर्द्धयेत् । तद्वृद्धिहेतुभिरौषधाद्यविहारैर्वर्द्धयित्वा समीकुर्य्यादित्यर्थः ।
"प्रवृद्धे समिते दोषे मध्यमः स्वयमेव हि ।
शान्तिं याति समं नीते त्वनुबन्ध्ये ऽनुबन्ध्यवत् ॥"
अस्यायमर्थः । वर्षासु वायुरनुबन्ध्यः सेव्यः । प्रधानमिति यावत् । पित्तश्लेष्माणावनुबन्धौ वायोरनुचरौ शरदि पित्तमनुबन्ध्यं कफोऽनुबन्धः । वसन्ते कफोऽनुबन्ध्यो वातपित्ते अनुबन्धौ तत्र यथानुबन्ध्येऽ प्रथमं नीतेऽनुबन्धः स्वयमेव शान्तिं याति । तथा प्रवृद्धे दोषे शमितं ह्रासयित्वा समीकृते मध्यमो दोषो हि नियमेन स्वयमेव शान्तिं याति प्रकृतौ भवतीत्यर्थः ॥*॥
अथ शीताङ्गादीनां सन्निपातज्वराणां त्रयोदशानां विशिष्टा चिकित्सा । तत्र शीताङ्गस्य चिकित्सामाह ।
"भास्करमूलं जीरकं व्योषभार्गी-
व्याघ्रीशुण्ठीपुष्करं गोजलेन ।
सिद्धं सद्यः शीतगात्रादिमोह-
श्वासश्लेष्मोद्रेककासान्निहन्ति ॥"
भास्करमूलं अर्कमूलम् ।
"कर्कोटिकाकन्दरजः कुलत्थ-
कृष्णावचाकट्फलकृष्णजीरैः ।
किराततिक्तानलकट्वलाबु-
पथ्याभिरुद्वर्त्तनमत्र शस्तम् ॥"
कर्कोटिकाकन्दरजः खखसामूलरजः ।
"रसविषमरिचमहेशप्रियफलभस्मैः कभूचतुर्व्वसुभिः ।
भार्गेश्मितमुद्धूलनमिदममितस्वेदशैत्यहरम् ॥"*
अथ तन्द्रिकस्य चिकित्सा ।
"क्षुद्रामृतानागरपौष्कराणि
शृतानि पीतानि शिवायुतानि ।
शुण्ठीकणागस्तिरसोषणानि
नस्येन तन्द्राविजयोल्वणानि ॥
मरिचकचपञ्चपचा वचा वक्
क्रमिहरनागरशर्व्वरीगवाक्षः ।
छगलकजलकल्किता नितान्तं
नसि निहिता ननु तन्द्रिकां जयन्ति ॥"
कचः बालकः । पञ्चपचा दारुहरिद्रा । वक् कुष्ठम् । क्रमिहरो विडङ्गः । शर्व्वरी हरिद्रा । गवाक्षी इन्द्रवारुणी । नसि नासिकायाम् ।
"तुरङ्गलालालवणोत्तमेन्द्र:
मनःशिलामागधिकामधूनि ।
नियोजितान्यञ्जनि निर्मितं द्राक्
तन्द्रीं सनिद्रां विनिवारयन्ति ॥".
लवणोत्तमं सैन्धवम् । इन्द्रः कर्पूरः । निद्रा अतिनिद्रा ॥*॥ अथ प्रलापकस्य चिकित्सा ।
"सतगरवरतिक्तो रेवताभीदतिक्ता-
नलदतुरगगन्धाभारतीहारहूराः ।
मलयजदशमूलीशङ्खपुष्पीशृतक्वाः
प्रलपनमपहन्युः पानतो नातिदूरात् ॥"
वरतिक्तोऽत्र पर्पटो न तु महानिम्बस्तन्त्रान्तरानुरोधात् । नलदं लामज्जकम् । तदभावादुशीरं ग्राह्यम् भारती ब्राह्मी । वरबी इति लोके । हारहूरा द्राक्षा ।
"सान्त्वनैरञ्जनैर्नस्यैस्तीक्ष्णैः स्तिमितसेवनैः ।
सर्व्वतो विकृतं चित्तमस्य प्रकृतिमानयेत् ॥"*॥
अथ रक्तष्ठीविनश्चिकित्सा ।
"रोहिषधन्वयवासकवासा-
पर्पटगन्धलताकटुकाभिः ।
शर्करया सममेष कषायः
क्षतजष्ठीविन उदित उपायः ॥"
रोहिषं सुगन्धतृणविशेषः । रोहित इति लोके । गन्धलता प्रियङ्गुः ।
पद्मकचन्दनपर्पटमुस्ता-
जातिवराकणचन्दनवारि ।
शीतकनिम्बयुतं परिपक्वं
वारि भवेदिह शोणितहारि ॥"
शीतकं यष्टीमधुकम् । इह रक्तष्ठीविनि ।
"मधुकमधूकपरूषकषाय-
चन्दनपद्मवदारुसनाथः ।
श्रीपर्णीफलशीतकषायः
सश्रित इह स्यादस्रजयाय ॥"
पद्मवं पद्मकम् । दारु: वालः । सनाथः सम्प्रधानः । श्रीपर्णी गम्भारी ॥*॥ अथ भुग्ननेत्रस्य चिकित्सा ।
"तुरङ्गगन्धालवणोग्रगन्धा-
मधूकसारोषणमागधीभिः ।
वस्ताम्बुपुष्टैर्लशुनान्विताभि-
र्नस्यं त्वसम्भुग्नदृशं करोति ॥"*॥
अथाभिन्यासस्य चिकित्सा ।
"शृङ्गीभार्ग्यभयाजाजीकणाभूनिम्बपर्पटैः ।
देवदारुवचाकुष्ठयासकट्फलनागरैः ॥
मुस्तधान्याकतिक्तेन्द्रयवपाठाहरेणुभिः ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकैः ॥
विशालारग्वधारिष्टशटीवाकुचिकाफलैः ।
विडङ्गरजनीदार्व्वीयवानीद्वयसंयुतैः ॥
समांशैर्व्विहितः क्वाथो हिङ्ग्वार्द्रकरसान्वितः ।
अभिन्यासज्वरं घोरं हन्ति तन्द्राञ्च तत्क्षणात्
प्रमोहं कर्णशूलञ्च सन्निपातांस्त्रयोदश ।
हिक्कां श्वासञ्च कासञ्च तथा सर्व्वानुपद्रवान् ॥"
इति शृङ्ग्यादिक्वाथः ॥*॥
अथ जिह्वकस्य चिकित्सा ।
"किराततिक्ताकुलकत्कलिञ्ज-
कर्पूरकृष्णाकटुतैलयुक्तः ।
अम्लद्रवः संशमयेद्रसज्ञा
दोषांस्तुतो दाशरथिर्यथाब्धिम् ॥"
आकुलकृत् अकरकरा इति लोके । कलिञ्जं कुलिञ्जन इति लोके । अम्लद्रवः बीजपुरादिरसः । इति किरातादिकवलः ॥*॥
"शालूरपर्णी मालूरमूलामयमधुप्लुता ।
शम्बूकपुष्पी सहिता सेव्या वाचां विशुद्धये ॥"
शालूरपर्णी ब्राह्मी । मालूरमूलं विल्वमूलम् ॥ आमयः कुष्ठम् । शम्बूकपुष्पी शङ्खपुष्पी । शालूरपर्ण्यादिरवलेहः ॥*॥
"क्षुद्रा नागरपुष्करामृतलता ब्राह्मी वचा-
सुव्रता ।
भार्गी वासकया सतोयसुरसा क्वाथो जये-
ज्जिह्वकम् ।
विश्वावर्म्मविभावरीयुगवरावत्सादनीवारिद-
व्याघ्रीनिम्बपटोलपुष्करजटादारुभिर्व्वा
कृतः ॥"
पुष्करं पुष्करमूलम् । तथा चामरसिंहः ।
"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।"
सुव्रता गन्धपलाशी काश्मीरे प्रसिद्धा । सुरसा तुलसी । विश्वादिर्योगान्तरम् । वर्म्म पर्प्पटः ॥ विभावरीयुगं हरिद्रा दारुहरिद्रा च । वरा त्रिफला । वत्सादनी गुडूची । व्याघ्री कण्ट-